Adda247

## વિભાગ-2 ( વિષયવસ્તુ અને પદ્ધતિશાસ્ત્ર ) (પ્રશ્ન નં.101 થી 170)

### પ્રશ્ન નં.101 થી 130 (દરેકના 2 ગુણ)

101 'वृत्तिः + मम + एव' अस्य योग्यः सन्धियुक्तः शब्दः कः वर्तते ?
(A) वृत्तिर्ममैव (B) वृत्तिर्ममेव (C) वृत्तिममैव (D) वृत्तिममेव

102 पुरुषवचनव्यवस्थानुसारं योग्यं वाक्यं किं वर्तते ?
(A) सः तावत् जलाशयान्तरं गच्छसि । (B) त्वं तावत् जलाशयान्तरं गच्छति ।
(C) वयं तावत् जलाशयान्तरं गच्छन्ति । (D) अहं तावत् जलाशयान्तरं गच्छामि ।

103 'विन्देयम्' इति धातुरूपस्य (क्रियापदस्य) रूपपरिचयं कारयत ।
(A) आज्ञार्थ, अन्यपुरुष, एकवचनम् (B) विध्यर्थ, उत्तमपुरुष, एकवचनम्
(C) हयस्तनभूतकाल, मध्यमपुरुष, द्विवचनम् (D) वर्तमानकाल, अन्यपुरुष बहुवचनम्

104 'क' विभागेन सह 'ख' विभागं योजयत ।

| 'क' | 'ख' |
|---|---|
| a. सिद्धहैमशब्दानुशासनम् | 1. द्वयाश्रयं महाकाव्यम् |
| b. अभिधानचिन्तामणिः | 2. अलङ्कारशास्त्रीयः ग्रन्थः |
| c. चालुक्यवंशोत्कीर्तनम् | 3. कोषग्रन्थः |
| d. काव्यानुशासनम् | 4. व्याकरणग्रन्थः |

(A) a-3, b-1, c-4, d-2 (B) a-2, b-4, c-1, d-3
(C) a-4, b-3, c-1, d-2 (D) a-2, b-3, c-4, d-1

105 सामासिकपदानां किं युग्मं योग्यं वर्तते ?
(A) लब्धविजयाः - समाहारद्वन्द्वः (B) परदोषदर्शनदक्षा-सप्तमीतत्पुरुषः
(C) दशरथपुत्रः-षष्ठीतत्पुरुषः (D) शिलालिखितम्-कर्मधारयः

106 सादृश्यस्य सिद्धान्तस्य उपदेशः केन कुत्र कृतः अस्ति ?
(A) पतञ्जलिना-व्याकरणमहाभाष्ये (B) पाणिनिना-अष्टाध्याय्याम्
(C) वात्स्यायनेन-वार्तिकग्रन्थे (D) भट्टोजीदीक्षितेन-सिद्धान्तकौमुद्याम्

107 अधोदत्तेभ्यः कस्मिन् वाक्ये विध्यर्थकृदन्तस्य प्रयोगः न वर्तते ?
(A) क्षणे क्षणे क्षीयमाणे शरीरे किं ते रमणीयम् । (B) तत् अधिकं शोचनीयम् अस्ति ।
(C) नृपतिं प्रति अविरूद्धा वृत्तिः वर्तितव्या । (D) तदुत्पन्ने यथाकार्यं तदनुष्ठेयम् ।

108 शिवस्य मूर्तिः कीदृशी अस्ति ?
(A) तवर्गरचिता अतवर्गप्रदा च (B) चवर्गरचिता अचवर्गप्रदा च
(C) पवर्गरचिता अपवर्गप्रदा च (D) कवर्गरचिता अकवर्गप्रदा च

109 अधोदत्तानां वाक्यानां युक्तं घटनाक्रमं दर्शयत ।
1. मोचयथ मां व्याघ्रमुखात् । 2. इदं खलु रूधिरं प्रस्रवति कण्ठात् ।
3. व्याघ्रेण गृहीतोऽस्मि । 4. अनाथ इव व्याघ्रेण खादितोऽस्मि ।
(A) 4, 3, 1, 2 (B) 3, 1, 4, 2 (C) 2, 4, 1, 3 (D) 2, 3, 4, 1

110 उपपदविभक्तिनाम् अधोदत्तेभ्यः युग्मेभ्यः किं युग्मं योग्यं नास्ति ?
(A) कृते - षष्ठीविभक्तिः (B) स्वस्ति-चतुर्थीविभक्तिः (C) प्रभृति-पञ्चमीविभक्तिः (D) निकषा-तृतीयाविभक्तिः

**111** 'सुदुर्लभा सर्वमनाम रमा वाणी' गद्यपाठः कस्य कस्मात् ग्रन्थात् स्वीकृतः अस्ति ?

(A) बल्लालसेनस्य भोजप्रबन्धग्रन्थात्
(B) पं. चारुदत्तशास्त्रेः प्रस्तावतरङ्गिणीग्रन्थात्
(C) पं. अम्बिकादत्तव्यासस्य शिवराजविजयग्रन्थात्
(D) चाणकस्य नीतिसारग्रन्थात्

**112** 'संगच्छध्वं सं वदध्वं ......, अस्य मन्त्रस्य मण्डलक्रमं, सूक्तक्रमं च दर्शयत ।

(A) मण्डलम्-1, सूक्तम्-59, मन्त्रः-8
(B) मण्डलम्-10, सूक्तम्-191, मन्त्रः-2
(C) मण्डलम्-3, सूक्तम्-30, मन्त्रः-2
(D) मण्डलम्-7, सूक्तम्-159, मन्त्रः-9

**113** 'शरीरमाद्यं खलु धर्मसाधनम् ।' इति केन कस्मिन् ग्रन्थे कथितं वर्तते ?

(A) माघेन-शिशुपालवधस्य तृतीये सर्गे
(B) बाणभट्टेन-हर्षचरितस्य चतुर्थे उच्छ्वासे
(C) कालिदासेन-कुमारसम्भवस्य पञ्चमे सर्गे
(D) भवभूतिना उत्तररामचरितस्य द्वितीये अङ्के

**114** 'क' विभागेन सह 'ख' विभागं योजयत ।

| 'क' | 'ख' |
|---|---|
| a. तीरे संलग्नता | 1. सामाजिक व्यवहाराणां भाराधिक्यम् |
| b. जले निमग्नता | 2. व्यसनेषु सततं पतनम् |
| c. आवर्तपातता | 3. परिवारात् प्रतिमुखत्वम् |
| d. नदीजलवियोगः | 4. आहारादीनां सेवने सततं प्रवृत्तिः |

(A) a-3, b-4, c-1, d-2
(B) a-2, b-3, c-4, d-1
(C) a-3, b-4, c-2, d-1
(D) a-4, b-1, c-2, d-3

**115** ततः सा _______, _______, भूमौ तान् शाकीन् अघट्टयत् ।' - योग्यशब्दाभ्यां रिक्तस्थाने पूरयत ।

(A) समायाम्, परिशुद्धायाम्
(B) समाम्, परिशुद्धाम्
(C) समौ, परिशुद्धौ
(D) समम्, परिशुद्धम्

**116** अधोदत्तेभ्यः किं वाक्यं चन्दनदासस्य न वर्तते ?

(A) मम तावत् यद्भवति तद्भवतु नाम ।
(B) कीदृशस्तृणानाम् अग्निना सह विरोधः ।
(C) अपि प्रचीयन्ते संव्यहाराणां वृद्धिलाभाः वः ।
(D) कः पुनः अधन्योः नृपतेः विरुद्धमाचरति ।

**117** अधोदत्तेभ्यः गुणेभ्यः कौ गुणौ श्वानस्य न वर्तते ? प्राप्ताशी, शीघ्रचेतनः प्रभुभक्तः, गूढगार्हस्थ्यम् स्वल्प सन्तुष्टः, शूरः, संयतेन्द्रियः, सुनिद्रः

(A) प्राप्ताशी, प्रभुभक्तः
(B) शीघ्रचेतनः, सुनिद्रः
(C) गूढगार्हस्थ्यम्, संयतेन्द्रियः
(D) शूरः, स्वल्प सन्तुष्टः

**118** चरकसंहितायाम् अनुक्रमेण कति प्रकरणानि अध्यायाः च सन्ति ?

(A) द्वादश - एकोनविंशत्युत्तर - द्विशतम्
(B) अष्टौ - विंशत्युत्तर - एकशतम्
(C) षड्-पञ्चविंशत्युत्तर - द्विशतम्
(D) दश - अष्टादशोत्तर - एकशतम्

**119** '____ त्वं मां न आह्वयसि ____ अहं द्वितीयं बिलं यास्यामि ।' - रिक्त स्थाने युक्ते अव्ययपदे लिखत ।

(A) यावत् ...... तावत् ......
(B) यदा ...... तदा ......
(C) यथा ...... तथा ......
(D) यदि ...... तर्हि ......

**120** 'अहं च त्वं च राजेन्द्र <u>लोकनाथौ</u> उभावपि ।' - रेखाङ्कित सामासिकपदे कः समासः वर्तते ?

(A) कर्मधारयः सप्तमीतत्पुरुषः च
(B) तृतीयातत्पुरुषः इतरेतरद्वन्द्वः च
(C) बहुव्रीहिः षष्ठीतत्पुरुषः च
(D) समाहारद्वन्द्वः उपपदतत्पुरुषः च

**121** '____, ____, भाषासु, - उचित विकल्पं चित्वा रिक्त स्थाने पूरयत ।

(A) भाषायाम्, भाषयोः
(B) भाषया, भाषाभ्याम्
(C) भाषायै, भाषाभ्याम्
(D) भाषायाः, भाषयोः

Adda247

**122** अधोदत्तानां पात्राणां किं नाम अयोग्यम् अस्ति ?

(A) शृगालः - दधिपुच्छः (B) कपोतः - चित्रग्रीवः (C) वायसः लघुपतनकः (D) सिंहः - मदोत्कटः

**123** 'श्रुणोतु भवान् सावधानेन मनसा ।' इति कः कस्मै कथयति ?

(A) गान्धिमहोदयः सत्यदेवाय (B) भोजराजः घटपण्डिताय (C) सन्यासी दौवारिकाय (D) शर्विलकः चारुदत्ताय

**124** अधोदत्तेभ्यः कर्तृकृतीनां विषये किम् उचितं नास्ति ?

(A) कालिदासः - ऋतुसंहारः (B) शूद्रकः - मृच्छकटिकम्

(C) विष्णुशर्मा - पञ्चरात्रम् (D) कृष्णद्वैपायन व्यासः - महाभारतम्

**125** 'क' विभागेन सह 'ख' विभागं योजयत

| 'क' विभागः | 'ख' विभागः |
|---|---|
| a) पूज्यतमस्य क्रियतां पूजा । | 1) अभिमन्युः |
| b) अशस्त्रेण इति कथ्यताम् । | 2) भगवान् श्रीकृष्णः |
| c) सुख मास्ते ते जननी । | 3) उत्तर कुमारः |
| d) एहि एहि वत्स । | 4) बृहन्नला |

(A) a-4, b-3, c-2, d-1 (B) a-3, b-1, c-4, d-2

(C) a-4, b-2, c-1, d-3 (D) a-3, b-2, c-4, d-1

**126** 'प्रविशति' क्रियापदस्य रूप परिचयं कारयत ।

(A) प्र + विश्, षष्ठगण, वर्तमानकाल, अन्यपुरुष, एकवचनम्

(B) प्रविश्, प्रथमगण, वर्तमानकाल, अन्य पुरुष, एकवचनम्

(C) प्र + विश्, चतुर्थगण, वर्तमानकाल, अन्य पुरुष, एकवचनम्

(D) प्र + विश्, प्रथमगण, भविष्यकाल, अन्य पुरुष, एकवचनम्

**127** अधोदत्तेभ्यः किं विशेषणं भोजराजस्य वर्तते ?

1) विद्याप्रियः 2) कलाप्रियः 3) धर्मप्रियः 4) प्रजाप्रियः

(A) केवलम् - 2, 4 (B) केवलम् - 1, 2, 4 (C) केवलम् - 1, 3, 4 (D) 1, 2, 3, 4

**128** अधोदत्तेभ्यः सामानार्थक शब्दानां किं युग्मम् उचितं नास्ति ?

(A) तोयम् - सलिलम् (B) कुञ्जरः - गजः (C) रिपुः - शत्रुः (D) भटः - ब्राह्मणः

**129** 'क' विभागेन सह 'ख' विभागं योजयत

| 'क' विभागः | 'ख' विभागः |
|---|---|
| a) द्रुमाः सपुष्पाः | 1) दिवसाश्च रम्याः । |
| b) स्त्रियः सकामाः | 2) सलिलं सपद्मम् । |
| c) सुखाः प्रदोषाः | 3) चारुतरं वसन्ते । |
| d) सर्वं प्रिये | 4) पवनः सुगन्धिः । |

(A) a-3, b-1, c-4, d-2 (B) a-2, b-3, c-4, d-1

(C) a-2, b-4, c-1, d-3 (D) a-3, b-4, c-2, d-1

**130** अधोत्तेभ्यः वाक्येभ्यः किं वाक्यम् उचितं सन्धियुक्तं वर्तते ?

(A) अद्य प्रातरेव अनिष्टदर्शनं सञ्जातम् । (B) अद्य प्रातरेव अनिष्टदर्शनम् सञ्जातं ।

(C) अद्य प्रातरेव अनिष्टदर्शनं सङ्जातम् । (D) अद्य प्रातरेव अनष्टिदर्शनमं सन्जातं ।

Adda247

પ્રશ્ન નં.131 થી 170 (દરેકના 1 ગુણ)

| | |
|---|---|
| 131 | संस्कृतशिक्षणस्य प्रत्यक्षपद्धति अन्तर्गत पाठस्य प्रारम्भे किम् आवश्यकम् ?<br>(A) कथायाः पाठनम् (B) शिक्षकस्य प्रवचनम् (C) छात्राणाम् समस्यानिवारणम् (D) प्रत्यक्ष वार्तालापम् |
| 132 | प्रवर्तमानकाले संस्कृतभाषायाः अध्यापन समये व्याकरणस्य अध्यापनार्थम् उपयुक्ता का ?<br>(A) भांण्डारकर पद्धति । (B) पाठशाला पद्धति । (C) आगमन निगमन पद्धत्याः विनियोगः (D) कण्ठस्थीकरणम् |
| 133 | काव्यस्य परिभाषायाः कृते असत्य विधानम् अन्वेषयत ।<br>(A) विश्वनाथः - 'काव्यं रसात्मकं काव्यम् ।'<br>(B) मम्मटः - 'रीतिरात्मा काव्यस्य ।'<br>(C) जगन्नाथः - 'रमणीयार्थ प्रतिपादकः शब्दः काव्यम् ।'<br>(D) आनन्दवर्धनः - 'काव्यस्यात्मा ध्वनिः ।' |
| 134 | श्रीमद् भगवद्गीतायाः ____ अध्याये अर्जुनस्य विषादं वर्णितम् अस्ति ।<br>(A) प्रथमम् (B) प्रथमस्य (C) प्रथमे (D) प्रथमः |
| 135 | अधोदत्तेषु पदेषु कर्मधारय समासं अन्वेषयतु ।<br>(A) रक्तबिम्बम् (B) वाचस्पतिः (C) जननान्तरम् (D) प्रत्यक्षम् |
| 136 | सन्धि कुरुत् : नि + सेधः = ____<br>(A) निस्सेधः (B) निर्सेधः (C) निषिद्धः (D) निषेधः |
| 137 | ____ त्रीणि रत्नानि जलमन्नं सुभाषितम् ।<br>(A) पृथ्व्या (B) पृथ्व्याम् (C) पृथ्वीम् (D) पृथ्व्यौ |
| 138 | 'लवणम्' एतस्य शब्दस्य समानार्थकः अन्वेषयतु ।<br>(A) सामुद्रम् (B) प्रधन (C) मिष्ठान्नम् (D) स्निग्धः |
| 139 | कस्य वर्णस्य उच्चारणस्थान दन्त्योष्ठ्य अस्ति ।<br>(A) त (B) म् (C) ल (D) व |
| 140 | माहेश्वरसूत्राणां कृते प्रचलिताः विधानाः सन्ति । तेषां एकं विधानं असत्यम् अस्ति ...<br>(A) शिवः नृत्यं पूर्णं कृत्वा ढक्कानादं कृतवान ।<br>(B) शिवः चतुर्दशवारं ढक्कानादं कृतवान ।<br>(C) शिवः नृत्यस्य प्रारम्भपूर्वे ढक्कानादं कृतवान ।<br>(D) शिवस्य ढक्कानादेन सूत्राणां प्रादुर्भावम् अभवत् । |
| 141 | संस्कृतभाषायाः शिक्षणकार्ये यदि अनुवादपद्धत्याः प्रयोगः भवति तर्हि ...<br>(i) छात्रेभ्यः अर्थबोधाय शिक्षकस्य कृते सरलता भवति ।<br>(ii) छात्राः केवल अनुवादं कण्ठस्थं कुर्वन्ति ।<br>(iii) वाक्ये प्रयुक्तानां प्रत्येकपदानां रुपपरिचयम् आवश्यकं भवति ।<br>(iv) एषा पद्धति अति असरकारिका अस्ति अतः तस्याः व्यापकं प्रयोगं भवति ।<br>दत्तेषु विधानेषु असत्यं विधानं कथयतु ।<br>(A) विधानम्-(i) (B) विधानम्-(ii) (C) विधानम्-(iii) (D) विधानम्-(iv) |
| 142 | संस्कृतभाषायाः व्याकरणे कारक इत्युक्ते ।<br>(A) विभक्तिः (B) नामपदानि (C) क्रियापदानि (D) अव्ययाः |
| 143 | भाण्डारकरपद्धत्या शिक्षण कार्यं कर्तुम् इच्छामः तर्हि पाठनस्य प्रारंभं केन भवति ?<br>(A) श्लोकगानेन (B) मन्त्रोच्चारणेन (C) व्याकरणेन (D) वार्ताकथनेन |

Adda247

**144** सः ग्रामं गच्छति । तत्र सेवाकार्यं करोति । समानार्थं दर्शकं वाक्यं दर्शयतु ।

(A) सः ग्रामं गमनाय तत्र सेवाकार्यं करोति । (B) सः ग्रामं गतः सेवाकार्यं करोति ।
(C) सः ग्रामं गत्वा तत्र सेवाकार्यं करोति । (D) सः ग्रामं गन्तुं तत्र सेवाकार्यं करोति ।

**145** 'उत्तररामचरितम्' नाटकस्य प्रधानरसः कः ।

(A) शान्तरसः (B) शृङ्गाररसः (C) करुणरसः (D) भक्तिरसः

**146** 'योगिनः ____ पश्यन्ति ।' - रिक्तस्थानं पूरयत ।

(A) चक्षुषा (B) मनसा (C) ज्ञानेन (D) कर्मणा

**147** कृषकपुत्रेण जनकस्य कः उपदेशः स्मृतः ?

(A) 'अन्यस्य धनस्य ग्रहणम् अस्माकं कुलाचारः न ।' इति
(B) 'वयं मेघजलम् एव पिबामः ।' इति
(C) 'क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।' इति
(D) 'सदैव रूणजनानां सेवा सुश्रूषा करणीया ।' इति

**148** वलभीविद्यास्थाने मिलितायां जैन साधूनां समितेः अध्यक्षः कः आसीत् ?

(A) स्थिरमतिः (B) हेमचन्द्रचार्यः (C) स्कन्दस्वामी (D) नागार्जुनः

**149** माधुर्यम्, अक्षर व्यक्तिः, पदच्छेदः, सुस्वरः, धैर्यम्, लयसमर्थम् - एते केषां गुणाः सन्ति ?

(A) भाषाकानाम् (B) लेखकानाम् (C) पाठकानाम् (D) श्रोतृणाम्

**150** शरणमुपेत्य पादयोः पतितः कृतापराधः शत्रुः ......

(A) अस्त्रेण हन्तव्यः । (B) शस्त्रेण न हन्तव्यः । (C) कारागृहे क्षेप्तव्यः । (D) मनसा न क्षन्तव्यः ।

**151** '____ युवाम्, युष्मान्' - रिक्तस्थाने योग्यं सर्वनामपदं किम् अस्ति ?

(A) त्वाम् (B) त्वया (C) त्वम् (D) त्वयि

**152** 'हनुमद्वर्णितरामवृत्तान्तः' पद्यपाठः रामायणस्य कस्मात् काण्डात् स्वीकृतः अस्ति !

(A) अयोध्याकाण्डात् (B) लङ्काकाण्डात् (C) अरण्यकाण्डात् (D) सुन्दरकाण्डात्

**153** यः खलु आर्षेण संस्कारेण संस्कृतः भवति तस्मै कीदृशी वाणी न रोचते ?

(A) ऋज्वी कर्कशा च (B) मृद्वा ऋज्वी च (C) कुटिला कर्कशा च (D) मृद्वा कुटिला च

**154** गते भर्तरि का रोदिति ?

(A) चक्रवाकी (B) प्रिया (C) क्रौञ्ची (D) सिमन्तिनी

**155** यां प्रहेलिकायां यदि उत्तरः तस्मिन्नेव श्लोके विद्यते तर्हि तां ____ उच्यते ।

(A) सुभाषितम् (B) बहिर्लापम् (C) अन्तरालापम् (D) अन्योक्तिः

**156** अहो, तपते रविः । ____ छायां गच्छामः ।

(A) तरुः (B) तरुणा (C) तरवे (D) तरोः

**157** ____ देवी सज्जनानां गृहे लक्ष्मीरुपेण वसति सा अस्माकं रक्षणं करोतु ।

(A) या (B) यस्या (C) यया (D) याम्

**158** (i) शकुन्तला जलाय नदीं अगच्छत् ।
(ii) शकुन्तला जलं आनेतुं नदीं अगच्छत् ।
उभयो मध्ये व्याकरण दृष्ट्या शुद्धं वाक्यं दर्शयत् ।

(A) प्रथमवाक्यम् (B) द्वितीयवाक्यम् (C) उभयोः शुद्धम् (D) उभयोः अशुद्धम्

**159** अधुना ____ विद्यालयेषु योगदिनस्य कार्यक्रमाः अभवन् ।

(A) बहुलाः (B) बहुना (C) बहुलम् (D) बहुलेषु

Adda247

| | |
|---|---|
| 160 | मानवमस्तिष्कस्य सर्वोत्तमा कृतिः का वर्तते ?<br>(A) अष्टाध्यायीनामकं संस्कृतव्याकरणम् (B) ऋग्वेदनामकः संसारस्य प्रथमः ग्रन्थः<br>(C) महाभारतनामकः विश्वस्य विशालकायः ग्रन्थः (D) प्रसिद्धम् आदिकाव्यं रमायणम् |
| 161 | असद्भिः शपथेन अपि प्रोक्तं वचनं कीदृशं वर्तते ?<br>(A) सुस्थिरम् (B) अनृतम् (C) चलम् (D) नश्वरम् |
| 162 | यदुकुलप्रवालः कुरुकुलप्रदीपः च कः अस्ति ?<br>(A) घटोत्कचः (B) अभिमन्युः (C) जनार्दनः (D) धनञ्जयः |
| 163 | कन्या तण्डुलान् केन प्रक्षालितवती ?<br>(A) असकृत् जलेन (B) किञ्चित् दुग्धेन (C) उष्णीकृतेन जलेन (D) शीतलेन जलेन एकवारम् |
| 164 | साक्षिभूतस्य मनुष्यस्य द्वितीयं कर्तव्यं किम् अस्ति ?<br>(A) बोधप्राप्तिः (B) दुःखानुभूतिः (C) स्थलात् पलायनम् (D) कर्तव्यस्य निर्वाहः |
| 165 | धर्मक्रोधयोः एकत्रवृत्तिः कीदृशी वर्तते ?<br>(A) अनिलानलयोरिव कर्तव्यविरोधिनी (B) अनिलानलयोरिव निसर्गविरोधिनी<br>(C) पयः पावकयोरिव कर्तव्यविरोधिनी (D) पयः पावकयोरिव निसर्गविरोधिनी |
| 166 | 'न जानामि ______ व्रतं वापि मातः ।' रिक्तस्थाने योग्यः शब्दः कः ?<br>(A) पूजाम् (B) भक्तिम् (C) मुक्तिम् (D) पुण्यम् |
| 167 | 'भवतः सर्वाणि पात्राणि मृतानि ।' इति कूटनाथः वित्तदासाय कथम् अकथयत् ?<br>(A) नतमस्तकेन (B) सहर्षेण (C) सशोकम् (D) अश्रुपूर्णनेत्राभ्याम् |
| 168 | 'कीर्तिः यस्य सः जीवति ।' इति वाक्यं कस्य पाठस्य प्रस्तावनायां लिखितम् अस्ति ?<br>(A) कलिकालसर्वज्ञा हेमचन्द्रः (B) क इदं दुष्करं कुर्यात् (C) यस्य जननं तस्य मरणम् (D) चक्षुष्मान् अन्ध एव |
| 169 | कस्मिन् अर्थे त्वं शोचितुं न अर्हसि ?<br>(A) जन्ममरणे (B) परिहार्ये (C) अपरिहार्ये (D) सुखदुःखे |
| 170 | अद्योदत्तेभ्यः किं विशेषणं जटायोः पक्षिराजत्वं सूचयति ?<br>(A) तीक्ष्णतुण्डः (B) खगाधिपः (C) अरिन्दमः (D) खगोत्तमः |

Adda247